संस्कृत वार्ता:

04/03/2026

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· फिनलैण्ड-देशस्य राष्ट्रपतिः अलेक्ज़ैण्डर् स्टब् इत्यस्य आगमनं नवदेहली-हेल्सिंकी इत्येतयोः सम्बन्धं नूतनाम् औन्नत्यम् यच्छतीति प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम्।

· पश्चिम-एशियाक्षेत्रे द्वन्द्वः तीव्रः भवति यतः इस्रायल-देशः इरान-लेबनान-देशयोः स्थानेषु लक्ष्यीकृत्य नूतनानि आक्रमणानि प्रारब्धवान्। इरान-देशे सहस्रतोऽधिकाः नागरिकाः मारिताः सन्ति।

· क्षेत्रीय-मध्यसंघर्षे यू. के. फ़्रान्स्-देशौ साईप्रस्-क्षेत्रे युद्धपोतान् वायु-रक्षासामग्रीं च नियोजयतः।

· गल्फ्-प्रदेशात् विलम्बितान् यात्रिकान् आनेतुं इण्डियन्-एयरलाइंस संस्थाभिः अद्य अष्टपञ्चाशत् विमानयानानि प्रचाल्यन्ते।

· वर्णपर्वणः होली-उत्सवः सम्पूर्णे देशे उत्साहेन आचर्यते।

· आई. सी. सी. पुरुषाणां टी-ट्वेन्टीति विश्वचषक-क्रीडायां दक्षिण-आफ़्रिका-न्यूजीलैण्ड-देशयोर्मध्ये अद्य सायङ्काले कोल्काता-नगरे प्रथमा उपान्त्यचक्रीयक्रीडा क्रीडिष्यते।

<u>प्रधानमन्त्री/फिन्लेण्ड्-देशस्य राष्ट्रपतिः</u>

फिन्लेण्ड्-देशस्य राष्ट्रपतिः अलेक्ज़ाण्डर् स्टब् इत्येषः अद्य प्रातः भारतस्य राजकीययात्रायै नवदिल्लीं समागतवान्। नवदिल्लीम् आगत्य श्री. स्टब् इत्यसौ सामाजिकान्तर्जालीय पटले अवोचत् यत् तस्य यात्रया व्यापार-क्षेत्रेण सह फिन्लेण्ड्-भारतयोः मध्ये सम्बन्धः इतोऽपि सुदृढो भविष्यति इति। फिन्लेण्ड्-देशस्य राष्ट्रपतेः स्वागतम् कुर्वन् प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् तस्य यात्रया भारत-फिन्लेण्ड्-देशयोः सम्बन्धः नूत्न-औन्नत्यं निष्चप्रचं प्राप्स्यति इति।

## पश्चिम-एशिया-द्वन्द्वः

पश्चिम-एशियाक्षेत्रे द्वन्द्वः तीव्रः अभवत् यतः इस्रायल-देशः इरान्-देशस्य तेह्रान्-नगरस्य बसिज्-नगरे, आन्तरिक-सुरक्षाधिकार-केन्द्रेषु च अनेकानि आक्रमणानि अकरोत्। इस्रायल-रक्षाबलैः सामाजिक-माध्यमे उक्तं यत् लक्ष्यीकृत-आदेश-केन्द्राणि इरानी-शासनेन सम्पूर्णे इरान-देशे नियन्त्रणं स्थापयितुं उपयुज्यन्ते इति। आई. डी. एफ्. इत्यनेन शासनस्य क्षिपणि-प्रक्षेपकानि अन्यानि च प्रणाल्यः अपि प्रयुक्तानि। इस्रायल-वायुसेनयापि उक्तं यत् वायुसेनायाः विमानानि विरुध्य वायु-रक्षा-प्रणालीं प्रवर्तयन्तः इरानी-सैनिकाः निष्प्रभाविताः अभवन् इति। अमेरिका-देशस्य मानवाधिकार-वार्तावाहिनी अवदत् यत् फेब्रुवरी-मासस्य अष्टाविंशति दिनाङ्कात् आरभ्य ईरान्-देशे एकादशशतप्रायः नागरिकाः मारिताः इति सूचितम् अस्ति। अमरीकादेशस्य केन्द्रीय रक्षाधिपतिः अड्मिरल् ब्राड् कूपर् इत्ययम् अवदत् यत् अमेरिकादेशः न स्थगितो भविष्यति अथ च इरान-देशस्य प्रत्याक्रमण-क्षमता द्रुतगत्या न्यूनीभवतीति।

## इरान-17 वेव् स्ट्रैक्स्:

ईरान्-देशस्य इस्लामिक्-रिवोल्यूशन्-गाड्र्स्-कार्प्स् इति संस्था अद्य अमेरिकादेशस्य इस्रायल-देशस्य लक्ष्याणाम् उपरि सप्तदश- आक्रमणानि आरभदिति प्रेस-टी. वी. इति संस्थया सूचितम्। आई. आर्. जी. सी. इत्यस्य जनसम्पर्काधिकारी अन्यस्य चरणस्य अभियानस्य घोषणां कुर्वन् अवदत् यत् संयुक्तस्य इस्रायल-यू. एस्. आक्रमणानन्तरं तत्क्षणमेव, तस्य भूसेनाः सपादद्विशततोऽधिकान् आक्रमणान् शत्रोः अधिकृत-भूमिषु, यू. एस्. आधारस्थानेषु च लक्ष्यान् प्रति प्रक्षेपितवन्तः इति। सः अवदत् यत् अनेकेषां भयोत्पादकसमूहानां मुख्यालयान् नाशयन्, बालहत्यायाः आक्रमणकारिणां विरुद्धं आई. आर. जी. सी. इत्यस्य वीरसैनिकानां प्रथमानि कार्याणि आसन्, तानिच क्रियमाणानि सन्तीति।

संयुक्त राज्य अमेरिका/फ्रांस/साइप्रस

पश्चिम-एशियायाः कतिपयक्षेत्रेषु कृताक्रमणानन्तरं ब्रिटेन्-फ्रान्स्-देशौ सायप्रस्-क्षेत्रे युद्धपोतान् वायु-रक्षा-प्रणाल्यश्च नियोजयन्तौ स्तःइत्येषा सूचना सामाजिक-प्रसारमाध्यमे ब्रिटिश्-प्रधानमन्त्री कीर् स्टार्मर् इत्यनेन दत्ता। सः अवदत् यत् ब्रिटेन-देशः स्वस्य रक्षात्मक-कार्याणि निरन्तरं कुर्वन् अस्ति। तेनोक्तं यत् यू. के.-देशः ड्रोन-प्रहारैः युक्तानि उदग्र-विमानानि प्रेषयति, सहैव हि एच्. एम्. एस्. ड्रैगन्-विमानान्यपि नियोजयतीति।

फ्रेञ्च्-देशस्य राष्ट्रपतिः इम्मानुयेल् म्याक्रोन् इत्येषः अपि विमानवाहकं चार्ल्स् डी गौल् इत्यमुं भूमध्यसागरम् उद्दिश्य गन्तुं आदिष्टवान्। अस्मिन् विषये सः अवदत् यत् फ़्रान्स्-देशः सुरक्षायै क्षेत्रीय-अखण्डतायै च अस्मिन् क्षेत्रे स्वसहयोगिभिः सह स्थितोऽस्तीति।

पश्चिम-एशिया-विमानयानानि

इण्डियन् एयर्लायिन्स इति संस्थया अद्य भारतस्य गल्फ्-प्रदेशस्य च मध्ये अष्टपञ्चाशत् विमानयानानि सञ्चालयितुं निश्चितम् कृतमस्ति, येन वार्तमानिक- संघर्षस्य कारणात् पश्चिम-एशियादेशे विलम्बितानामवरुद्धानां वा यात्रिकाणां सञ्चारः सुकरः भवेदिति। नागरिक-विमानयान-मन्त्रालयः एकस्मिन् वक्तव्ये अवदत् यत् भारतीय-विमान-संस्थाः अद्य अष्टपञ्चाशत् विमानयानानि सञ्चालयितुं योजनां कुर्वन्त्यः सन्ति, येषु इण्डिगो-संस्थायाः त्रिंशत्, एयर्-इण्डिया-संस्थायाः, एयर्-इण्डिया-एक्स्प्रेस्-संस्थायाः च त्रयोविंशतिः विमानयानानि सन्ति। मन्त्रालयः अवदत् यत् पश्चिम-एशियायाः केषुचित् भागेषु विकसितायाः वायुप्रदेशस्य स्थित्या सह अन्ताराष्ट्रियविमानप्रचालनेषु तस्य प्रभावस्य च निरन्तरं निरीक्षणं कुर्वन् अस्तीति। मन्त्रालयः इत्यपि दृढीकृतवान् यत् सर्वकारः विमानसेवाभिः सह निरन्तरतया सम्पर्के अस्ति तथा च अस्मिन् काले यात्रापत्रेषु अनुचितमूल्यवृद्धिः न भवेदिति सुनिश्चितं कर्तुं विमानयान-शुल्कस्य निरीक्षणं निकटतया कुर्वन् अस्ति।

## होलिकोत्सवः

वर्णपर्व होलिकोत्सवः अद्य अशेषे देशे सोल्लासं समाचर्यते। एषः उत्सवः अशुभस्य उपरि शुभस्य विजयेन सह वसन्तकालस्य आरम्भमपि सूचयति। मध्यप्रदेशे पारम्परिक-लोकगीतैः, साम्प्रदायिक-भोजैः, जीवन्त-लोकगीतैश्च चिह्नितः होली-उत्सवः अत्यन्तम् उत्साहेन आचर्यते। हिमाचलप्रदेशे जनाः प्रातःकालादेव अबीर् गुलाल् इत्येतयोः लेपनेन परस्परं अभिवादनपुरस्सरं उत्सवमिमं समाचरन्तः सन्ति। राष्ट्रपतिपदासीना द्रौपदी मुर्मु, उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः, प्रधानमन्त्री नरेन्द्रमोदी च अस्मिन् अवसरे जनान् प्रति शुभाशयान् प्रेषितवन्तः। सामाजिक-प्रसार-माध्यमे राष्ट्रपतिः अवदत् यत् वर्णपर्व जनानां जीवने प्रेम आशां च आनयति, ऐक्यं भ्रातृत्वं च सुदृढं करोतीति। उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः अवदत् यत् अयम् उत्सवः देशस्य समृद्धपरम्परासु गभीरतया निहितः अस्ति, तथा च एतत् भ्रातृत्वं, परस्परम् आदरं, सहभागी-आनन्दं च प्रतिबिम्बयति, येन समाजस्य संरचनायाः सुदृढीकरणं भवति। प्रधानमन्त्री मोदी अवदत् यत् होली-पर्व सम्पूर्णं वातावरणम् नूतनशक्त्या पूरयति इति। सः कामनाम् अकरोत् यत् वर्णपर्व प्रत्येकस्य जीवने सुखम्, समृद्धिं, साफल्यं च आनयतीति।

## टी-20 विश्वकपः

आई. सी. सी. पुरुषाणां टी-20 इति विश्वचषक-क्रीडायां अद्य कोल्काता-नगरस्य ईडन्-गार्डन्स् इत्यत्र प्रथमायां उपान्त्यचक्रीय-क्रीडायां दक्षिण-आफ़्रिका-देशः न्यूज़ीलैण्ड-देशेन सह क्रीडति। क्रीडा सायं सप्तवादने आरप्स्यते। श्वः मुम्बै-नगरस्य वानखेडे-क्रीडाङ्गणे द्वितीय-उपान्त्यस्पर्धायां भारतं इङ्ग्लेण्ड्-देशेन सह क्रीडिष्यति। एतयोः द्वयोः स्पर्धयोः विजेतारौ अहमदाबाद्-नगरस्य नरेन्द्र मोदी-क्रीडाङ्गणे मार्च्-मासस्य अष्टमे दिनाङ्के अन्तिमस्पर्धायां परस्परसाम्मुख्यं करिष्यतः।

।। इति वार्ता: ।।